प्रशस्ते अयन्तु उत्तरपदस्थः "प्रशंसावचनैश्च" पा० ख्रण-सर्पन्नित्यं समस्तः अजहल्लिङ्गश्च कुमारीतल्लज इत्यादि ।

**तल्लिका** स्त्री तस्मिन् लीयते ली—ड संज्ञायां कन् कापि अत इत्त्वम् (ताली) कुञ्जिकायां शब्दार्थचि० ।

**तल्ली** स्त्री तत् प्रसिद्धं यथा तथा लसति लस—ड गौरा० ङीष् । १तरुण्याम् मेदि० ।

**तल्वकार** पु० सामवेदस्य शाखाभेदे तलवकारशब्दे दृश्यम् ।

**तवक्षीर** न० तु—अच् नित्यकर्म्म० । (तिखुर) ख्याते पदार्थे "तवक्षीरन्तु मधुरं शिशिरं दाहपित्तहृत् । क्षयकासकफश्वासास्रदोषं हन्ति सेवनात्" २गन्धलतायां स्त्री राजनि० । [ ३यवासशर्कराभेदे राजनि० ।

**तवराज** पु० तु—अच् तवः पूर्णः सन् राजते राज—अच् ।

**तवराजोद्भव** पु० तवराजादुद्भवति उद्+भू—अच् । यवा-सशर्कराजाते खण्डभेदे । "तवराजोद्भवः खण्डो दाह-तृष्णाविनाशनः । मूर्च्छामोहस्य तापस्य श्वासस्य च निवारकः । इन्द्रियतर्पणः शीतः सदा मधुर एव च" राजनि० ।

**तवर्ग** पु० त+वर्ग । त थ द ध न क्रमेषु वर्णेषु । तत्र भवः वर्गान्तत्वात् छ । तवर्गीय तत्र भवे वर्णे ।

**तवस्** न० तु—असुन् । १वृद्धे २महति ३बले च निघण्टुः । "अल्पादचिन्तं तवसा जवन्यः" ऋ०३।२०।८ "तवसा बलेन" भा० । "तवस्तमस्तवसां वज्रवाहो !" ऋ० २।३३।३ । "प्रवाहिनां तवसं जग्मुरथ्याम्" ऋ० १०।२८।७ । तवसे बलाय हितं—यत् । तवस्य बलहिते बलसाधने च त्रि० "तस्मै तवस्यमनुदानि" ऋ०२।२०।८। तवोऽस्त्यस्य मतुप् मस्य वः सान्तत्वात् मत्वर्थे न विसर्गः । तवस्वत् बलयुक्ते त्रि० "वीर उशते तवस्वान्" ऋ० ६।९७।४६ । पक्षे विनि तवस्विन् तत्रार्थे त्रि०उभयत्र स्त्रियां ङीप् ।

**तवागा** त्रि० तवसा बलेन गीयते गै—कर्म्मणि क्विप् पृषो० । प्रवृद्धबलयुक्ते "स्तुषे स सुव स्थविरं तवागाम्" ऋ० ४।१८।१० "तवागाम् प्रवृद्धबलम्" भा० ।

**तविपुला** स्त्री चतुर्थवर्णात् परं तगणपूर्वके विपुलाछन्दोभेदे "तोऽब्धेस्तत्पूर्वान्या भवेत्" वृ०र० । अब्धेश्चतुर्थाक्षरात् परं तगणश्चेत् तपूर्वा तविपुलानाम छन्दः इति तदर्थः ।

**तविष** पु०स्त्री०तव—"तवेर्णिद्वा" उणा० टिषच् । १स्वर्गे २समुद्रे च "तविषताविषावब्धिं त्रिदिवं चाहतुः क्वचित्" । "३देव-कन्यायां ४भूमौ ५नद्याञ्च स्त्री उज्ज्व० टित्त्वात् ङीप् । ६वृद्धे ७महति त्रि० निघण्टुः । ८शक्तौ ९व्यवसाये पु० सि०कौ० १०बलवति च त्रि० । "वनो वृत्राणां तविषो बभूथ" ऋ०८।९६।१८ "तविषः प्रवृद्धो बलवान्वा" भा० "अहं ह्युग्रस्तविषस्तुविष्मान्" १।१६५।६ मेदिन्यां तवीषेति दीर्घमध्यपाठो लिपिकरप्रमादकृतः ह्रस्वम-ध्यपाठस्यैव प्रयोगदर्शनात् उणादिसूत्रे तथैव व्युत्-पादितत्वाच्च । [४गुणिते च ।

**तष्ट** त्रि० तक्ष—क्त । १तनूकृते २द्विधाकृते, च । ३ताड़िते

**तष्टि** स्त्री तक्ष—क्तिच् । तक्षणे ।

**तष्टृ** पु० तक्ष—तृच् । १त्वष्टरि (छुतार) २जातिभेदे ३विश्वकर्म्मणि ४आदित्यभेदे च रमानाथः ।

**तस** अलङ्कारे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् । तंसयति-ते तंसति अततंसत्-त अतंसीत् । ततंस "प्रतिजानामीति ते पिता गर्भे सुष्टिमतंसयत्" यजु० २३।२४ अवतंसः उत्तंसः । भ्वादित्वपक्षे अस्य आत्मने-पदित्वं केचिदिच्छन्ति तंसते अतंसिष्ट ।

**तस** उत्क्षेपे दिवा० पर० सक० सेट् । तस्यति इरित् अतसत् अतसीत् अतासीत् । ततास तेसतुः । उदित् तसित्वा तस्त्वा । तस्तः "यस्य तस्य विना षष्ठीं तेनेति करणं विना" उद्भटः ।

**तसर** पु० तन्—कसरन् ।(गुटिपोकार सुता) सूत्रभेदे उणा०

**तस्कर** त्रि० तत् करोति कृ—टच् "तद्बृहतोः करप-त्योः" पा० सुट् दलोपश्च । १चौरे २वृक्काशाके (पिड़िङ) शाकभेदे पु० रत्नमा० । ३मदनवृक्षे पु० जटा० ४श्रवणे "व्यावृत्ता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता" रघुः "तस्करः कर्णचौरयोरिति" रघुटीकाधृतकोषा-न्तरं मल्लिनाथेन तु अस्य न कर्णार्थकतां स्वीचकार किन्तु तस्य श्लोकस्यार्थान्तरमाह स्म यथा "तस्करता चौर्य्यं परस्वेभ्यः परधनेभ्यः स्वविषयभूतेभ्यः व्यावृत्ता सती श्रुतौ वाचकशब्दे स्थिता प्रवृत्ता अपहार्य्या-भावात् तस्करशब्द एव अपहृतः इत्यर्थः" । ५कोपनायां नार्य्यां स्त्री शब्दार्थकल्प० टित्त्वात् ङीप् ।

**तस्करस्नायु** पु० तस्करस्य वृक्काशाकस्येव स्नायुरिव नाड़िका अस्याः । काकनासालतायाम् राजनि० ।

**तस्थिवस्** त्रि० स्था—क्वसु । स्थितवति "स पाटलायां गवि तस्थिवांसम्" "तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधि-तस्थुषि" रघुः ।

**तस्थु** त्रि० स्था—बा० कु द्वित्वञ्च । स्थावरे "देहञ्च सर्व-संघातो जगत् तस्थुरिति द्विधा" भाग० ७।७२।स्लो० ।